# संस्कृतवार्ताः

**दिनाङ्क :-29.10.2025** **प्रातः - 06:55**

## चक्रवातः मोन्था

मोन्था-चक्रवातः गतरात्रौ आन्ध्रप्रदेशस्य यानम्-तटस्य च मचिलीपट्टणं-कलिङ्गपट्टणं-नगरयोः मध्ये नवतितः शतं किलोमीटर् परिमितं यावत् प्रतिहोरायाः वायुवेगेन प्रविष्टम्। भारत-ऋतु-विभागेन उक्तं यत्, आन्ध्रप्रदेशस्य काकीनाडा-नगरस्य समीपे गतसायं सप्तवादने मोन्था-चक्रवातः भूमौ प्रवेशं आरब्धवान् । अनेन चक्रवातेन आन्ध्रप्रदेशे प्रचण्डवृष्टिः अभवत्, येन राज्ये त्रिचत्वारिंशत्सहस्र-हेक्टेयर्-क्षेत्रेषु सस्यानां क्षतिः अभवत्। ऋतु-विभागेन पूर्वानुमितं यत् अद्य आन्ध्रप्रदेशस्य यानम्-प्रदेशस्य च अधिकांशेषु स्थानेषु लघुतः मध्यम-वृष्टिः, कतिपयेषु स्थानेषु च अतिवृष्टिः भविष्यति इति। तस्मिन् एव काले पृथक् -पृथक्-स्थानेषु विंशति सेण्टिमीटर् यावत् अत्यधिकवृष्टेः सम्भावना विद्यते। राज्य-आपत्-प्रबंधन-प्राधिकरणस्य नियन्त्रण-प्रकोष्ठे चक्रवातस्य अनन्तरं स्थितेः समीक्षानन्तरम् ओडिशा-राज्यस्य मुख्यमन्त्री श्रीमाझी इत्येषः अवदत् यत् केषुचित् क्षेत्रेषु लघुभूस्खलनस्य, वृक्षाणां उन्मूलनस्य च सूचनाः सन्ति। राष्ट्रिय-आपत् -प्रतिक्रिया-बलस्य षड्विंशति -दलानि नियोजितानि सन्ति , तेषु द्वादशदलानि आन्ध्रप्रदेशे, षट्-दलानि ओडिशा-राज्ये, त्रीणि-दलानि उत्तर-तमिल्नाडु-प्रदेशे च सन्ति। छत्तीसगढ-तेलङ्गाना-प्रदेशयोः अपि कर्मचारिणः नियुक्ताः सन्ति। केन्द्रीय-स्वास्थ्य-मन्त्रालयः आन्ध्रप्रदेशः, ओडिशा, तमिळुनाडु इत्यादीनां पूर्वीतटीय-राज्यानां वरिष्ठैः अधिकारिभिः सह मोन्था-चक्रवातस्य सज्जता-उपायानां समीक्षा कृतवान्।

## आन्ध्रप्रदेशस्य रेलमन्त्री

रेलमन्त्री अश्विनी-वैष्णवः आन्ध्रप्रदेशस्य मुख्यमन्त्रिणा चन्द्रबाबु-नायडु इत्यनेन, ओडिशा-राज्यस्य मुख्यमन्त्रिणा मोहनचरण-माझी इत्यनेन सह सम्बद्धैः रेल्-अधिकारिभिः च सह मोंथा-चक्रवातस्य अनन्तरं उभयोः राज्ययोः तत्क्षणस्य पुनःकार्याचरणस्य विषये वार्तालापम् अकरोत्। सामाजिकान्तर्जालीय-संदेशे श्रीवैष्णवः अवदत् यत् चक्रवातस्य दृष्ट्या विभागीयक्षेत्रे नियन्त्रण-कक्षाः संस्थापिताः सन्ति।

## प्रधानमन्त्री-मुम्बई

प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य मुम्बईनगरे द मेरिटाईम लीडर्स् कोन्क्लेव इत्याख्यं सम्मेलनं सम्बोधयिष्यति। अस्मिन् अवसरे सः ऐषमः भारतस्य समुद्रीय-सप्ताहस्य वैश्विक-समुद्रीय-सीईओ मञ्चस्य अध्यक्षतां अपि करिष्यति। एकस्मिन् सामाजिकान्तर्जालीय सन्देशे श्रीमोदी अलिखत् यत् समुद्रीयक्षेत्रे सहयोगसंवर्धनाय तथा च तस्मिन् एव भारतस्य परिष्कारान् प्रकाशनाय सम्मेलनम् एकः उत्तमः मञ्चः अस्तीति। अत्रान्तरे, वार्ताहरसम्मेलनं सम्बोधयन्, केन्द्रीय-पत्तन-नौवहन-जलमार्ग-मन्त्री सर्बानन्द-सोनोवालः अवदत् यत्, श्रीमोदिनः नेतृत्वे केवलं एकादशवर्षेषु एव भारतस्य समुद्रीय-क्षेत्रस्य पत्तन-क्षमता प्रायः द्विगुणिता जाता।

## मन्त्रिमण्डल

केन्द्रीयमन्त्रिमण्डलेन अष्टमस्य केन्द्रीयवेतनआयोगस्य कार्यक्षेत्रस्य अनुमोदनं कृतम्। ह्यः नवदिल्ल्यां मन्त्रिमण्डलीयोपवेशनानन्तरं वार्ताहरान् ज्ञापयन् सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत् आयोगः गठनानन्तरं अष्टादश मासेषु स्वस्य अनुशंसाः प्रस्तोष्यति। सः सूचितवान् यत् आयोगे एकः अध्यक्षः, एकः अंशकालिकः सदस्यः, एकः सचिवः च ऐते भविष्यन्ति।

**बिहार निर्वाचनं**

बिहार्-राज्ये एन्. डी. ए., महा-गठबन्धनाभ्यां च सह विभिन्नानां राजनैतिकदलानां नेतारः ह्यः विधानसभा-निर्वाचनस्य क्षेत्रेषु प्रचारं कृतवन्तः। महाघटबन्धनेन स्वस्य संयुक्त-निर्वाचन-घोषणा-पत्रम् लोकार्पितम्, यस्मिन् वृत्यावसर, स्वास्थ्य, शिक्षा, सामाजिक-कल्याणादि विषयेषु अवधानं दत्तम् अस्ति। आर्. जे. डी. इति राष्ट्रिय-जनता-दलं, काङ्ग्रेस्-दलं च मिलित्वा महाघटबन्धनस्य च सप्तदलानि संयुक्तरूपेण घोषणापत्रं प्रकाशितवन्तः। घोषणा-पत्रे प्रत्येकपरिवारस्य एकस्मै सदस्याय स्थायी-वृत्यावसरं प्रदातुं प्रतिज्ञा अस्ति, सर्वकारस्य निर्माणस्य विंशति दिवसेषु विधिः अधिनियमितः भविष्यति।

**सरदार-पटेल्-स्मृति-व्याख्यानम्**

केन्द्रीय-श्रम-वृत्यावसर-युव-कार्याणां-क्रीडामन्त्री डा. मनसुख माण्डवीयः अद्य सायङ्काले नवदिल्ल्याम् अस्य वर्षस्य सरदार-पटेल्-स्मृति-व्याख्यानं प्रदास्यति । अस्मिन् अवसरे सूचना-प्रसारण-राज्यमन्त्री डा. एल्. मुरुगनः अपि उपस्थितः भविष्यति।

भारतस्य प्रथमस्य सूचना-प्रसारण-मन्त्रिणः सरदार् वल्लभभाई पटेलस्य सम्माने आकाशवाणी प्रतिवर्षं वार्षिकं सरदार-पटेल-स्मृति-व्याख्यानम् आयोजयति।

**।।इति वार्ताः।।**